कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्ब्बतः ।
सर्ब्बेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीयीताध्ययन्नित्यं ब्राह्मण्याद्धीयतेऽन्यथा ॥”
इति कौर्म्मे उपविभागे १३ अध्यायः ॥ * ॥
पाठनिषेधकालो यथा । ग्रहणेऽनध्यायो न ग्रहोपरागमात्रविषयः ।
“चाहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ।”
इति मनुवचनेन सामान्यतो निषेधात् ॥
एष त्र्यहानध्यायो ग्रस्तास्तविषय इति मिताक्षरा अन्यत्र त्वहोरात्रमनध्यायो याज्ञवल्क्यात् । यथा,—
“सन्ध्यागर्ज्जितनिर्घातभूकम्पोल्कानिपातने ।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥”
द्युनिशमहोरात्रम् । चैत्रश्रावणमार्गशीर्षाणामादिप्रतिपदो नित्याः इति ब्रह्मचारिकाण्डधृतहारीतवचने एतासामनध्याये नित्यत्वाभिधानादन्यासां काम्यत्वम् । आदिप्रतिपदः शुक्लप्रतिपदः ॥
“सा च यौधिष्ठिरी सेना गाङ्गेयशरताड़िता ।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता ॥”
इति व्यासवचनमपि तावन्मात्रपरम् ॥ * ॥
गोभिलोक्ताकालिकानध्याया यथा,—
आकालिकनिर्घातभूकम्पराहुदर्शनोल्का इति आकालिका इति । निमित्तकालमारभ्य परेद्युर्यावत् स एव कालस्तावदकालस्तत्र भवाः ॥
तथा,—
“विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥” * ॥
उल्कादिषु प्रतिप्रसवमाह मनुः ।
“वेदोपकरणे चैव स्वाध्याये चैव नित्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥”
पराशरभाष्ये कूर्म्मपुराणम् ।
“अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥”
नारदः ।
“शयने विबुधे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु ॥”*॥
सन्ध्यागर्ज्जने शास्त्रचिन्तानिन्दामाह ज्योतिश्चिन्तामणौ दुर्व्वासाः ।
“सन्ध्यायां गर्जिते मेघे शास्त्रचिन्तां करोति यः ।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम् ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सज्योतिः स्यादनध्याय इत्याह भगवान् मनुः ॥”
इति मनुवचनं वर्षाविषयम् ॥*॥
अष्टम्यादिषु विशेषमाह हेमाद्रिधृतापस्तम्बः ।
“उदयास्तमिते वापि मुहूर्त्तत्रयगामि यत् ।
तद्दिनं तदहोरात्रमनध्यायविदो विदुः ॥
केचिदाहुः क्वचिद्देशे यावत्तु दिननाड़िकाः ।
तावदेव त्वनध्यायो न तन्मिश्रे दिनान्तरे ॥”
तद्दिनं तां तिथिं प्राप्येत्यर्थः । दिनान्तरे तिथ्यन्तरे । अत्र पूर्ब्बवचनमुत्तरमीमांसाध्यायिभिः परिगृहीतम् । परवचनन्तु अन्यग्रन्थपरम् । यत्तु निर्णयामृतधृतम् ।
“प्रतिपत्त्रिंशमात्रेण कलामात्रेण चाष्टमी ।
दिनं दूषयते सर्व्वं सुरा गद्यघटं यथा ॥”
तद्दूषयत इत्यभिधानात पूर्ब्बवर्णितामात्रेण सर्व्वदिनदूषणाय । राजमार्त्तण्डे ।
“प्रे क्री चे चा द्वितीयास्ताः प्रेतपक्षे गते तु याः ।
या तु कोजागरे जाते चैत्रापल्याः परेऽपि या ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
सर्व्वास्वेतास्वनध्यायः पुराणैः परिकीर्त्तितः ॥”
इति तिथ्यादितत्त्वम् ॥
पाठकः, त्रि, ( पाठयति अध्यापयतीति । पठ-, णिच् + ण्वुल् । ) उपाध्यायः । इति हेमचन्द्रः । १ । ७८ ॥ ( यथा, महाभारते ।३।३१२।१०५।
“पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥”)
धर्म्मभाणकः । इति त्रिकाण्डशेषः ॥ ( पठतीति । पठ + ण्वुल् । वाचकः । अध्येता ।
“वर्णं मिलनचापि कासितं श्वासितन्तथा ।
नीचोच्चञ्चैव गभीरं वर्ज्जयेत् पाठकः सुधीः ॥”
इति हारीते प्रथमस्थाने प्रथमेऽध्याये ॥ )
पाठभूः, स्त्री, ( पाठस्य भूर्भूमिः स्थानमित्यर्थः । ) ब्रह्मारण्यम् । वेदादिपाठस्थानम् । इति त्रिकाण्डशेषः ॥
पाठमञ्जरी, स्त्री, ( मञ्जु सुन्दरं यथा तथा रायति शब्दायते इति । मञ्जु + रै + कः । स्त्रियां ङीप् । पृषोदरादित्वात् लोपः । ततः पाठस्य मञ्जरी वाचिकेव । ) शारी पक्षिणी । इति शब्दमाला ॥
पाठशाला, स्त्री, अध्ययनगृहम् । पाठस्य अध्ययनस्य शाला गृहम् । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥
पाठशालिनी, स्त्री, (पाठेन शालते श्लाघते इति । शाल + णिनिः + ङीप् । ) शारी पक्षिणी । इति शब्दमाला ॥
पाठा, स्त्री, ( पठ्यते बहुगुणवत्तया कथ्यते इति । पठ + कर्म्मणि घञ् । अजादित्वात् टाप् । ) लताविशेषः । आकनादि इति भाषा । तत्पर्य्यायः । अम्बष्ठा २ अम्बष्ठिका ३ प्राचीना ४ पापचेलिका ५ यूथिका ६ स्थापनी ७ श्रेयसी ८ विद्धकर्णिका ९ एकाष्ठीला १० कुचेली ११ दीपनी १२ वनतिक्तिका १३ तिक्तपुष्पा १४ वृहत्तिक्ता १५ शिशिरा १६ वृकी १७ मालती १८ वरा १९ देवी २० वृत्तपर्णी २१ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातपित्तज्वरपित्तदाहातीसारशूलनाशित्वम् । भग्नसन्धानकारित्वञ्च । इति वैद्यकम् ॥ * ॥
“अम्बष्ठा बालिका बाला शठाम्ला बालिकाम्लिका ।
अम्बा च माचिका चैव दृढ़वल्का मयूरिका ॥
गन्धपर्णी चित्रपुष्पी श्रेयसी सुखवासिका ।
छिन्नपत्री भूरिमल्लिर्विज्ञेया षोड़शाह्वया ॥
अम्बष्ठा सकषायाम्ला कफकण्ठरुजापहा ।
वातामयवलासघ्नी रुचिकृद्दीपनी परा ॥”
इति राजनिर्घण्टः ॥
“पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्द्दिकुष्ठातीसारहृद्रुजः ॥
दाहकण्डूविषश्वासकृमिगुल्मगलव्रणान् ॥”
इति भावप्रकाशः ॥
पाठिका, स्त्री, ( पाठा + स्वार्थे कन् । टापि अत इत्वञ्च । ) पाठा । इति भावप्रकाशः ॥
पाठी, [ न् ] पुं, ( पाठेव आकृतिर्विद्यते यस्य । पाठा + इनिः । ) चित्रकवृक्षः । इत्यमरः ॥ (पाठोऽस्त्यस्येति । “अत इनिठनौ ।”५।२।११५। इति इनिः । ) पाठविशिष्टः ॥ (कर्म्मोपपदेनास्य प्रमाणं यथा, मार्कण्डेये । ६८ । २६ ।
“बन्दिनामथ सूतानां विटानां लास्यपाठिनाम् ॥” )
पाठीकुटः, पुं, (पाठीं कुटतीति । कुट + “इगुपधज्ञेति ।” ३ । १।१३५ । इति कः । ) चित्रकवृक्षः । इति राजनिर्घण्टः ॥
पाठीनः, पुं, ( पाठिं पृष्ठं नमयतीति । पाठि + नम + णिच् + “अन्येभ्योऽपीति ।”ड्ः ।“अन्येषामपि दृश्यते ।” ६ । ३ । १३७ । इति दीर्घः । ) मत्स्यविशेषः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इत्यमरः ॥ सहस्रदंष्ट्री ३ बोदालः ४ वदालकः ५ । इति शब्दरत्नावली ॥ ( यथा, मनुः । ५ । १६ ।
“पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥”)
अस्य गुणाः । श्लेष्मलत्वम् । स्निग्धत्वम् । मधुरत्वम् । कषायत्वम् । बल्यत्वम् । वृष्यत्वम् । पाके कटुत्वम् । रोचनत्वम् । वातपित्तजित्त्वञ्च । इति राजवल्लभः ॥ ( यथा च ।
“पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः ।
दूषयद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥ )
पाठकः । गुग्गुलुद्रुमः । इति मेदिनी । ने, ८८ ॥
पाठ्यं, त्रि, (पठ्यते इति । पठ + “ऋहलोर्ण्यत् ।” ३ । १ । १२४ । इति ण्यत् । ) पठनीयम् । पठितव्यम् । यथा,—
“तिष्ठ रे तिष्ठ कण्ठोष्ठं कुट्टयामि हठादहम् ।
अपठ्यं पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥”
इति नैषधे १७ सर्गः ॥
पाणः, पुं, ( पण्यते व्यवह्रियतेऽनेनेति । पण + करणे घञ् । ) पाणिः । इति शब्दचन्द्रिका ॥ ( पण + भावे घञ् । पणनम् । समयः । यथा, महाभारते । २ । ५७ । ८ ।
“दीव्यामहे पार्थिव ! मा विशङ्कां कुरुष्व पाणञ्च चिरञ्च मा कृथाः ॥”)